**अण** शब्दे भ्वादि० पर० अक० सेट्। अणति। आणीत्।

**अण** जीवने दिवा० आत्म० अक० सेट्। अण्यते आणिष्ट।

**अण (न) क** त्रि० अणति यथेच्छम् नदति अण-अच् ततः कुत्सायाम् क। अधमे, निन्दिते च। "पापाणके कुत्सितैरिति पा०"। अणक कुलालः सि०कौ०। दन्त्यमध्यश्चायमित्यन्ये।

**अणव्य** त्रि० अणोः सूक्ष्मशस्य चीनादिकस्य भवनं क्षेत्रम् अणु+यत्। चीनकादिसमुत्पत्तियोग्ये (चिनाभूमि) क्षेत्रे।

**अणि** पु० स्त्री अणति शब्दायते अण-इन्। (आरा) इति ख्याते रथचक्राग्रस्थिते कीलके, सूच्याद्यग्रभागे च। स्त्रीत्वे वा ङीप्। अत्र आदेर्दीर्घतापीष्यते। तेन आणिः आणी।

**अणिमन्** पु० अणोर्भावः अणु+इमनिच्। सूक्ष्मत्वे सूक्ष्मपरिमाणे, ऐश्वर्य्यभेदे च यद्वशात् सूक्ष्मीभूय सर्व्वत्र गन्तुं शक्नोति। ऐश्वर्य्याणि च। "अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा। ईशित्वं च वशित्वञ्च तथा कामावसायिता" इत्युक्तानि। एतेषां स्वरूपाणि ऐश्वर्य्यपदार्थनिरूपणे वक्ष्यन्ते। "यथा केशः सहस्रधा भिन्नस्तावताणिम्नेति" वेदः।

**अणिष्ठ** त्रि० अतिशयेन अणु-इष्ठन्। अणुतरे अतिसूक्ष्मे। "अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत् पुरीषं, यन्मध्यस्तन्मांसं, योऽणिष्ठस्तन्मन" इति छा०उ०।

**अणीमाण्डव्य** पु० अणौ शूलाग्रं तच्चिह्नितः माण्डव्यः। तन्नामके मुनिभेदे। तस्य तत्प्रोतत्वकथा भार०आ०प०। "बभ्रूव ब्राह्मणः कश्चिन्माण्डव्य इति विश्रुतः। धृतिमान् सर्व्वधर्म्मज्ञः सत्ये तपसि च स्थितः॥ स आश्रमपदद्वारि वृक्षमूले महातपाः। ऊर्द्ध्वबाहुर्म्महायोगी तस्थौ मौनव्रतान्वितः॥ तस्य कालेन महता तस्मिंस्तपसि वर्त्ततः। तमाश्रमपदं प्राप्ता दस्यवो लोप्त्रहारिणः॥ अनुसार्य्यमाणा बहुभी रक्षिभिर्भरतर्षभ!। ते तस्यावसथे लोप्त्रं दस्यवः कुरुसत्तम!। निधाय च भयाल्लीनास्तत्रैवानागते बले॥ तेषु लीनेष्वथो शीघ्रं ततस्तद्रक्षिणां बलम्। आजगाम ततोऽपश्यंस्तमृषिं तस्करानुगाः॥ तमपृच्छंस्ततो राजंस्तथावृत्तं तपोधनम्। कतमेन पथा याता दस्यवो द्विजसत्तम!। तेन गच्छामहे ब्रह्मन्! पथा शीघ्रतरं वयम्॥ तथा तु रक्षिणां तेषां ब्रुवतां स तपोधनः। न किञ्चिद्वचनं राजन्नब्रवीत् साध्वसाधु वा॥ ततस्ते राजपुरुषा विचिन्वानास्तमाश्रमम्। ददृशुस्तत्र लीनांस्तांश्चौरांस्तद्द्रव्यमेव च॥ ततः शङ्का समभवद्रक्षिणां तं मुनिं प्रति। संयम्यैनं ततो राज्ञे दस्यूंश्चैव न्यवेदयन्॥ तं राजा सह तैश्चौरैरन्वशाद्वध्यतामिति। स रक्षिभिस्तैरज्ञातः शूले प्रोतो महायशाः॥ ततस्ते शूल आरोप्य तं मुनिं रक्षिणस्तदा। प्रतिजग्मुर्म्महीपालं धनान्यादाय तान्यथ॥ शूलस्थः स तु धर्म्मात्मा कालेन महता ततः। निराहारोऽपि विप्रर्षिर्म्मरणं नाभ्यपद्यत। धारयामास च प्राणान्ऋषींश्च समुपानयत्॥ शूलाग्रे तप्यमानेन तपस्तेन महात्मना। सन्तापं परमं जग्मुर्म्मुनयस्तपसान्विताः॥ ते रात्रौ शकुना भूत्वा सन्निपत्य तु भारत!। दर्शयन्तो यथाशक्ति तमपृच्छन् द्विजोत्तमम्॥ श्रोतुमिच्छामहे ब्रह्मन्! किं पापं कृतवानसि। येनेह समनुप्राप्तं शूले दुःखभयं महत्॥ वैशम्पायन उवाच। ततः स मुनिशार्दूलस्तानुवाच तपोधनान्। दोषतः कं गमिष्यामि न हि मेऽन्योऽपराध्यति॥ तं दृष्ट्वा रक्षिणस्तत्र तथा बहुतिथेऽहनि। न्यवेदयंस्तथा राज्ञे यथावृत्तं नराधिप!॥ श्रुत्वा च वचनं तेषां निश्चित्य सह बन्धुभिः। प्रसादयामास तदा शूलस्थमृषिसत्तमम्॥ राजोवाच। यन्मयापकृतं मोहादज्ञानादृषिसत्तम!। प्रसादये त्वां तत्राहं न मे त्वं क्रोद्धुमर्हसि॥ एवमुक्तस्ततो राज्ञा प्रसादमकरोन्मुनिः। कृतप्रसादं राजा तं ततः समवतारयत्॥ अवतार्य्य च शूलाग्रात्तच्छूलं निश्चकर्ष ह। अशक्नुवंश्च निष्क्रष्टुं शूलं मूले स चिच्छिदे॥ स तथान्तर्गतेनैव शूलेन व्यचरन्मुनिः। तेनातितपसा लोकान् विजिग्ये दुर्लभान् परैः। अणीमाण्डव्य इति च ततो लोकेषु गीयते" इति॥

**अणीयस्** त्रि० अतिशयेन अणुः अणु+ईयसुन्। अणुतरे अतिसूक्ष्मे "अणोरणीयान् महतो महीयान् इति" श्रुतिः। स्त्रियां ङीप्।

**अणु** त्रि० अण-उन्। क्षुद्रे, सूक्ष्मपरिमाणवति, द्रव्ये, लेशे च। (चिना, काङ्नी, श्यामा) प्रभृति सूक्ष्मधान्ये पु०। "अनणुषु दशमांशोऽणुष्वथैकादशांश" इति लीला०। अणुशब्दो हि परिमाणविशेषवाची। तत्र परिमाणस्य चतुर्विधा स्थूलसूक्ष्मदीर्घह्रस्वत्वरूपाः "अथादेशो नेति नेति" इत्युपक्रम्य "अस्थूलमनण्वह्रस्वमदीर्घमित्यादि" श्रुत्या चतुर्विधपरिमाणस्यैव ब्रह्मणि निषेधेन परिमाणचातुर्विध्यलाभः एतन्मूलकमेव शारीरकभाष्ये, वैशेषिकसूत्रे, न्यायकन्दल्याञ्च उक्तभेदमादायैव परिमाणचातुर्विध्यमुक्तम्। तत्रारम्भकद्रव्यभूयस्त्वाभूयस्त्वाभ्यां स्थूलसूक्ष्मत्वे ह्रस्वदीर्घत्वे तु तत्तच्छब्दे वक्ष्येते। एवञ्च सूक्ष्मपदार्थे आरम्भकाल्प-